# Dhishuddhi Stotram

# ધીશુદ્ધિસ્તોત્રમ્

## Document Information

Text title : Dhishuddhi Stotram

File name : dhIshuddhistotram.itx

Category : vishhnu, vAdirAja, vishnu, stotra

Location : doc_vishhnu

Author : vAdirAjayati

Proofread by : Mrs Sornavalli, Revathy R.

Latest update : May 10, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 10, 2024

*sanskritdocuments.org*

# ધીશુદ્ધિસ્તોત્રમ્

ચિન્તામણિર્હયગ્રીવો વશે યસ્ય નિષેવિણઃ ।
સોઽપિ સર્વાર્થદો નૃણાં કિમુતાસૌ હયાનનઃ ॥ ૧॥

યં યં ચિન્મય સન્મૂર્તે ધર્મં કુર્મસ્તવાજ્ઞયા ।
તં તં ઘ્નન્ત્યસુરાઃ કિં તદ્ઘ્નન્તા ત્વં તાન્ન કૃન્તસિ ॥ ૨॥

ત્વદ્દત્તપુણ્યવિત્તં મે સદ્યઃ પાપૈરપાહરન્ ।
કૃદ્ધા દૈત્યા ન દૈત્યારે તદ્વિક્રાન્તેરલં તવ ॥ ૩॥

સ્વક્ષેમ રામ મે કામે રક્ષાંસ્યક્ષાણ્યચિક્ષિપન્ ।
તત્ક્ષામ્યં ન હૃષીકેશસ્યાક્ષય્યત્રય્યધીશિતુઃ ॥ ૪॥

સ્વપ્નોઽપિ સૂચકો યસ્માત્તસ્માદસ્માકમચ્યુત ।
અસ્વપ્નપ્રિય ન સ્વપ્નેઽપ્યક્ષં નિક્ષિપ દુષ્કૃતે ॥ ૫॥

ક્વાહં નૃહય તેઽઙ્ઘ્રિકશરણઃ કરુણામ્બુધે ।
ક્વેદં નિસ્સારસંસારનીહારાવરણં મમ ॥ ૬॥

અનુત્સાહમહોત્સાહચરણસ્મરણે સતામ્ ।
શરણે સતિ જલ્પન્તઃ કિમસન્તો હસન્તિ નઃ ॥ ૭॥

કસ્ય કસ્ય પ્રિયં બ્રૂમઃ સ્તુમઃ કં કં પદે પદે ।
કસ્મૈ કસ્મૈ દિશામોઽર્થં કસ્માદ્વાઽસ્મત્પ્રયોજનમ્ ॥ ૮॥

કો વા જીવાપરસ્ત્રાતા દેવાચ્છ્રીવાસુદેવતઃ ।
યો વા ગા વાતિ યશ્ચોર્ધ્વં તૌ વાતૌ વામનાશ્રિતૌ ॥ ૯॥

માં ચેન્મુઞ્ચતિ દેવોઽસૌ ગાં ચ મુઞ્ચતિ વૈદિકીમ્ ।
સત્યવ્રતસ્ય નાસત્યં ભક્તસ્ય ન કદાઽપિ ભીઃ ॥ ૧૦॥

પ્રભો પ્રબોધ્ય બોધાબ્ધિં પ્રબુદ્ધબુધસાધ્ય તે ।
કૃપાક્ષપાકરકરશ્ચકોરીમિવ પાતુ મામ્ ॥ ૧૧॥

સેયં શ્રીશહયગ્રીવદાસેનાઽઽચાર્યસેવિના ।
યતિના વાદિરાજેન સ્તુતિર્ધીશુદ્ધયે કૃતા ॥ ૧૨॥

ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતં
ધીશુદ્ધિસ્તોત્રં સમ્પૂર્ણમ્ ।

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ।

Proofread by Mrs Sornavalli

---

*Dhishuddhi Stotram*

pdf was typeset on May 10, 2024

Please send corrections to *sanskrit@cheerful.com*